# ३९ एकोनचत्वारिंश दशकः - मणिद्वीप निवासिनी

सुधासमुद्रो जगतां त्रयाणां छत्रीभवन् मञ्जु तरङ्ग फेनः ।
सवालुका शङ्ख विचित्र रत्नः सतारक व्योम समो विभाति ॥ ३९-१॥

तन्मध्य देशे विमलं मणिद्वीप आख्यां पदं देवि विराजते ते ।
यदुच्यते संसृति नाशकारि सर्वोत्तरं पावन पावनं च ॥ ३९-२॥

तत्रास्त्ययो धातु मयो मनोज्ञः सालो महासार मयस्ततश्च ।
एवं च ताम्रादि मयाः किलाष्टा-दशाति चित्रा वरणा लसन्ति ॥ ३९-३॥

तैरावृतं ते पदम द्वितीयं विभाति चिन्तामणि सद्म देवि ।
सन्त्यत्र सत्स्तम्भ सहस्ररम्य शृङ्गार मुक्त्यादिक मण्डपाश्च ॥ ३९-४॥

ब्रह्माण्डकोटीः सुख मावसन्त उपासकास्ते मनुजाः सुराश्च ।
दैत्याश्च सिद्धाश्च तथेतरे च यदन्ततो यान्ति पदं तदेतत् ॥ ३९-५॥

त्वं मण्डपस्था बहुशक्ति युक्ता शृणोषि देवी कल गीतकानि ।
ज्ञानं विमुक्तिं च ददासि लोक-रक्षा मजस्रं कुरुषे च देवि ॥ ३९-६॥

मञ्चोऽस्ति चिन्तामणि गेहतस्ते ब्रह्मा हरी रुद्र इहेश्वरश्च ।
खुरा भवन्त्यस्य सदाशिवस्तु विराजते सत्फलक त्वमाप्तः ॥ ३९-७॥

तस्योपरि श्रीभुवनेश्वरि त्वं सर्वेश वामाङ्क तले निषण्णा ।
चतुर्भुजा भूषण भूषिताङ्गी निर्व्याज कारुण्यवती विभासि ॥ ३९-८॥

प्रतिक्षणं कारयसि त्वमिच्छा-ज्ञान क्रिया शक्ति समन्विताऽत्र ।
त्रिमूर्तिभिः शक्ति सहस्रयुक्ता ब्रह्माण्ड सर्ग स्थिति संहृतीश्च ॥ ३९-९॥

सा त्वं हि वाचां मनसोऽप्यगम्या विचित्ररूपाऽसि सदाऽप्यरूपा ।
पुरः सतां सन्निहिता कृपार्द्रा सदा मणिद्वीप निवासिनी च ॥ ३९-१०॥

मातर्मदन्तःकरणे निषण्णा विद्यामयं मां कुरु बन्ध मुक्तम् ।
बन्धं च मोक्षं च ददास्यसक्ता दासोऽस्मि ते देवि नमो नमस्ते ॥ ३९-११॥

** सुधा सिन्धो र्मध्ये सुरविटपि वाटी परिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणि गृहे ।
शिवाकारे मञ्चे परमशिव पर्यङ्क निलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्द लहरीम् ॥ **